नामांका: Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **22**

**S-71-Sanskrit (T.L.)**

No. of Printed Pages – **12**

# माध्यमिक परीक्षा, 2017

# SECONDARY EXAMINATION, 2017

# तृतीय भाषा - संस्कृतम्

समय : $3\frac{1}{4}$ (सपाद होरात्रयम्)

अधिकतमांका: 80

**परीक्षार्थिभ्य: सामान्यनिर्देशा:**

(1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क: अनिवार्यत: लेख्य: ।

(2) **सर्वे** प्रश्ना: अनिवार्या: ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागा: एकत्र एव लेखनीया ।

(5) सर्वे प्रश्ना: संस्कृतभाषयैव उत्तरणीया: ।

1. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

स्वस्था: छात्रा: समये उत्तिष्ठन्ति, समये निद्रां सेवन्ते, समये पठन्ति, समये क्रीडन्ति पर्यटन्ति च । ते कदापि धूम्रपानं, नाधिकं चायपानं मद्यपानं वा सेवन्ते । ते अधिकं दूरदर्शनमपि न पश्यन्ति । समयस्य सदुपयोगं कुर्वन्ति । श्रेष्ठजनसंगतौ एव निवसन्ति । एतादृशा: छात्रा एवं नीरोगा:, दीर्घजीविन:, राष्ट्रभक्ता: देशजनानुरागिणश्च भवन्ति । अत: सुस्वास्थ्यमेव जीवनस्य सर्वश्रेष्ठधनं विद्यते ।

(क) एकपदेन उत्तरत –

(i) समयस्य सदुपयोगं के कुर्वन्ति ? ½

(ii) जीवनस्य सर्वश्रेष्ठधनं किम् अस्ति ? ½

(ख) पूर्णवाक्येन उत्तरत –

श्रेष्ठजनसंगतौ के निवसन्ति ? **1**

(ग) निर्देशानुसारम् उत्तरत –

(i) 'ते कदापि धूम्रपानं….' अत्र 'ते' सर्वनामस्थाने संज्ञापदं लिखत । ½

(ii) 'स्वस्था: छात्रा:' इत्यत्र विशेषणपदं किम् ? ½

(iii) 'भ्रमन्ति' पदस्य गद्यांशात् पर्यायपदं लिखत । ½

(iv) 'समये निद्रां सेवन्ते' अत्र क्रियापदं लिखत । ½

2. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानामुत्तराणि यथानिर्देशं लिखत –

विशिष्टं ज्ञानमेव विज्ञानं भवति । ज्ञानस्य कस्मिन्नपि क्षेत्रे यदा मानव: बुद्धिपूर्वकं, तर्कपूर्वकं च कामपि विशिष्टताम् अन्वेषयति, तदा तदेव वैशिष्ट्यं विज्ञानं भवति । अधुना सर्वस्मिन् संसारे विज्ञानस्यैव प्रभावो दृश्यते । अस्माकं शती तु विज्ञानशती अस्ति । अस्यां शताब्द्यां नहि किमपि तादृशं कार्यमस्ति, यत्र विज्ञानस्यावश्यकतां प्रभावं च न पश्याम: । गृहे आपणे वा, ग्रामे नगरे वा, मनोरंजनक्षेत्रे कार्यक्षेत्रे वा सर्वत्रैव विज्ञानस्यापेक्षा विद्यत एव । विज्ञानाविष्कारै: समस्तमेव भूमण्डलं परिव्याप्तम् । इदं परिलक्ष्यते यत् सर्वाणि कार्याणि विज्ञानेनैव संचालितानि भवन्ति ।

(क) एकपदेन उत्तरत –

(i) विशिष्टं ज्ञानं किं भवति ? ½

(ii) सर्वाणि कार्याणि केन संचालितानि ? ½

(iii) अस्माकं शती कीदृशी शती अस्ति ? ½

(iv) अधुना विज्ञानस्य प्रभाव: कुत्र दृश्यते ? ½

(ख) पूर्णवाक्येन उत्तरत –

(i) विज्ञानाविष्कारै: किं परिव्याप्तम् ? **1**

(ii) विज्ञानस्यापेक्षा कुत्र विद्यते ? **1**

(iii) किं वैशिष्ट्यं विज्ञानं भवति ? **1**

(ग) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत । **1**

(घ) यथानिर्देशं प्रश्नान् उत्तरत –

(i) 'सर्वस्मिन् संसारे' अत्र विशेष्यपदं किम् ? ½

(ii) 'यदा मानव: बुद्धिपूर्वकं विशिष्टताम् अन्वेषयति' अत्र कर्तृपदं लिखत । ½

(iii) 'परिलक्ष्यते' इत्यस्य पर्यायपदं गद्यांशात् लिखत । ½

(iv) 'विज्ञानस्यापेक्षा विद्यते एव' इत्यत्र क्रियापदं लिखत । ½

3. भवान् सुरेन्द्र: । स्वकीयं मित्रं महावीरं प्रति एकं पत्रं लिखत यस्मिन् शैक्षिकभ्रमणस्य वर्णनं स्यात् । **½ × 8 = 4**

**अथवा**

भवान् अभिषेक: । स्वकीयं पितरं विश्वनाथं प्रति 'स्वविद्यालस्य विषये' अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत ।

| |
|---|
| आदर्शविद्यालय:, श्रेष्ठ:, भवतां, विद्यालये, विद्यार्थिन:, अध्ययनं, कृपापत्रं, व्यवस्था । |

परीक्षाभवनत:

तिथि : 17/03/2017

परमपूज्या: पितृचरणा:,

सादरं प्रणम्यन्ते ।

अहमत्र कुशलं __________ कृपाप्रसादात् । अद्यैव भवतां ________ प्राप्तम् । अत्र मम ________ सुष्ठुरूपेण प्रचलति । अयम् अस्माकं विद्यालय: अतीव _________ अस्ति । अस्मिन् ________ छात्राणां संख्या प्राय: सहस्त्रमस्ति । पुस्तकालयस्य ________ अपि समीचीना वर्तते । सर्वे ________ अनुशासिता: सदाचरणशीलाश्च सन्ति । वस्तुत: मम विद्यालय: ________ अस्ति ।

भवतां कृपापत्रप्रतीक्षायाम् !

भवत: पुत्र:

अभिषेक:

4. मञ्जूषात: उचितानि पदानि गृहीत्वा छात्र-अध्यापकयो: सम्भाषणं लिखत – **½ × 8 = 4**

| अष्टाविंशति:, नमोनम:, कति, सम्यक्, दीपावल्या:, दातुं, राज्यानां, पठनीयम् । |
|---|

छात्रा: – सुप्रभातं, गुरुवर !.............. ।

अध्यापक: – सुप्रभातं, सर्वेभ्य:............ शुभकामना ।

अध्यापक: – भवतु ! अद्य किं ……….. ।

छात्रा: – वयं सर्वे स्वदेशस्य ………… विषये ज्ञातुमिच्छाम: ।

अध्यापक: – शोभनम् । वदत, अस्माकं देशे ………… राज्यानि सन्ति ।

मनीषा – चतुर्विंशति: महोदय ।

अध्यापक: – अशुद्धम्, अन्य: कोऽपि यो शुद्धोत्तरं …………. शक्यते ।

अनिता – मे भगिनी कथयति यत् अस्माकं देशे …………. राज्यानि सन्ति ।

अध्यापक: – ……….. जानाति ते भगिनी ।

5. अध: चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते अष्टवाक्यानि रचयत । **8 × ½ = 4**

| |
|---|
| भगवान् बुद्ध:, कपिलवस्तुराज्ये, यशोधरा, एकस्यां रात्रौ, बुद्धत्त्वप्राप्तये, इतस्तत:, महाबोधम्, पूर्णशान्तिम् । |



**अथवा**

अधोलिखितम् अनुच्छेदं मञ्जूषाया: सहायतया पूरयित्वा लिखत –

| |
|---|
| सर्वदा, वार्धक्यम्, व्यायाम:, मनुष्य:, अस्माभि:, विरुद्धं, अरय:, गात्राणाम् । |

(i) शरीरस्य आयासजननं कर्म ________ इति कथ्यते ।

(ii) ________ व्यायामिनं न अर्दयन्ति ।

(iii) आत्महितैषिभि: ________ व्यायाम: कर्त्तव्य: ।

(iv) व्यायामं कुर्वत: ________ भोजनम् अपि परिपच्यते ।

(v) ________ सुविभक्तता व्यायामेन संभवति ।

(vi) यो ________ सम्यक् रूपेण व्यायामं करोति, स: नीरोगी भवति ।

(vii) व्यायामिन: जनस्य सकाशं ________ अपि नायाति ।

(viii) अत: ________ व्यायाम: अवश्यमेव कर्त्तव्य: ।

6. पाठ्यपुस्तकात् द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न स्याताम् । **2 × 2 = 4**

7. अधोलिखितेषु पदेषु सन्धि-विच्छेदम् अथवा सन्धिं कृत्वा सन्धे: नामापि लिखत –

(i) यथा + इच्छम् **1**

(ii) प्रियं वद **1**

(iii) यशोगानम् **1**

8. अधोलिखितवाक्येषु रेखांकित समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत –

(i) इदं स्थानं निर्जनम् अस्ति । **1**

(ii) तौ पाणिपादम् प्रक्षालयतः । **1**

(iii) शकटीयानं कज्जलम् इव मलिनं धूमं मुञ्चति । **1**

9. कोष्ठकेषु प्रदत्तैः शब्दैः प्रकृतिप्रत्ययानुसारं रिक्तस्थानानि पूरयत –

(i) सः ________ गृहं प्रति धावति । (हस् + शतृ) **1**

(ii) भर्तृहरिः ________ राजा आसीत् । (बुद्धि + मतुप्) **1**

(iii) इयं ________ शोभनं नृत्यति । (नर्तक + ङीप्) **1**

(iv) इदं ________ उद्यानम् अस्ति । (दृश् + अनीयर्) **1**

10. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत –

| ह्यः, सम्प्रति, कदा, श्वः |
|---|

(i) त्वं विद्यालयं ________ गच्छसि ? **1**

(ii) अहं तत्र _______ एव गच्छामि । **1**

(iii) नेहा ________ विद्यालयं कथं नागच्छत् ? **1**

(iv) सा _______ विद्यालयं अवश्यमेव आगमिष्यति । **1**

11. अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत –


(i) बलवान् विरुद्धमपि भोजनं पचति । **1**

(ii) लतया गीतं गीयते । **1**

(iii) ऋजुलः सुन्दरं लेखं लिखति । **1**

(iv) कृष्णेन कंसः हन्यते । **1**

12. घटिकाचित्रस्य सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम् –




(i) आशुतोष: प्रात: _________ वादने व्यायामं करोति । **1**

(ii) स: सायं _________ वादने क्रीडनाय गच्छति । **1**

(iii) स्वाध्यायानन्तरं रात्रौ स: ________ वादने शयनं करोति । **1**

13. (i) 'एकस्मिन्' इति संख्यापदस्य स्वरचितवाक्ये प्रयोग: करणीय: । **1**

(ii) 87 इति संख्यां संस्कृतभाषायां शब्दे लिखत । **1**

14. अधोलिखितं वाक्यद्वयं शुद्धं कृत्वा लिखत –

(i) भवन्त: कुत्र गच्छथ ? **½**

(ii) अहं श्व: विद्यालयं न गच्छामि । **½**

15. अधोलिखितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत –

तत्राश्रमे राज्ञो निवासादिव्यवस्थामपि निर्धार्य मुनिर्न किमप्यवोचत् प्रत्युत स्वकीयानि कार्याणि यथापूर्वमाचरत् । राजा पुन:पुन: तानेव प्रश्नानुपस्थाप्य मुनेरुत्तरं प्रतीक्षितवान् । किन्तु मुनिर्न किमपि वक्तुमुत्सुक: । स च निरन्तरमाश्रमस्य कर्षणं, मार्जनं, सेचनं तथान्यानि कार्याणि कर्तुं व्यापृत: । राजा निराशो भूत्वा प्रत्यावर्तनस्य विचारं चकार ।

(क) एकपदेन उत्तरत –

(i) आश्रमे मुनि: कस्य निवासादिव्यवस्थाम् अकरोत् ? ½

(ii) राजा कस्य उत्तरं प्रतीक्षितवान् ? ½

(ख) पूर्णवाक्येन उत्तरत –

मुनि: निरन्तरं कानि कार्याणि कर्तुं व्यापृत: ? 1

(ग) 'स्वकीयानि कार्याणि' इत्यत्र विशेष्यपदं लिखत । 1

(घ) 'राजा निराशो भूत्वा प्रत्यावर्तनस्य विचारं चकार' इत्यत्र क्रियापदं लिखत । 1

(ङ) 'आगमनस्य' पदस्य विलोमपदं गद्यांशात् लिखत । 1

16. अधोलिखितं पद्यं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत –

भुक्ता मृणालपटली भवता निपीता –
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस ! वद तस्य सरोवरस्य,
कृत्येन केन भवितासि कृतोपकार: ।।

(क) एकपदेन उत्तरत –

(i) मृणालपटली केन भुक्ता ? ½

(ii) राजहंसेन कस्य नलिनानि निषेवितानि ? ½

(ख) राजहंसेन सरोवरस्य कानि निपीतानि ? 1

(ग) 'कमलानि' पदस्य पर्यायपदं पद्यांशात् लिखत । 1

(घ) 'अपकार:' पदस्य विलोमपदं पद्यांशात् लिखत । 1

(ङ) 'भुक्ता मृणालपटली भवता' इत्यत्र कर्तृपदं लिखत । 1

17. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानामुत्तराणि यथानिर्देशं लिखत –

राम: – समरूप: शरीरसन्निवेश: । वयसस्तु न किञ्चिदन्तरम् ।

लव: – आवां यमलौ ।

राम: – सम्प्रति युज्यते । किं नामधेयम् ?

लव: – आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि

(कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम्....

कुश: – अहमपि कुश इत्यात्मानं श्रावयामि ।

राम: – अहो उदात्तरम्य: समुदाचार: ।

किं नामधेयो भवतोर्गुरु: ?

(क) एकपदेन उत्तरत –

(i) यमलौ कौ ? ½

(ii) कुशलवयो: गुरो: नाम क: पृच्छति ? ½

(ख) पूर्णवाक्येन उत्तरत –

कुशलवयो: समुदाचार: कीदृश: ? **1**

(ग) 'समरूप: शरीरसन्निवेश:' इत्यत्र विशेषणपदं लिखत । **1**

(घ) 'लव इत्यात्मानं श्रावयामि' इत्यत्र क्रियापदं लिखत । **1**

(ङ) 'शिष्टाचार:' पदस्य पर्यायपदं नाट्यांशात् लिखत । **1**

18. 'बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा' समभावसूक्तिमाध्यमेन इत्यस्य भावबोधनं सरलसंस्कृतभाषया लिखत । **2**

19. एक एव खगो मानी वने वसति चातकः । **4 × ½ = 2**

पिपासितो वा म्रियते याचते वा पुरन्दरम् ।।

उपर्युक्तस्य श्लोकस्य अन्वयमाश्रित्य रिक्तस्थानानि पूरयत –

एक एव (i) _______ खगः चातकः (ii) _______ वसति ।

वा पिपासितः (iii) _______ पुरन्दरम् (iv) _______ वा ।।

20. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत –

(i) चौरः कर्पटं क्षिप्त्वा निर्गतः । **1**

(ii) निर्धनः जनः परमर्थकार्श्येन पदातिरेव गच्छति । **1**

(iii) सिंहः वने वसति । **1**

21. अधोलिखितानि वाक्यानि क्रमरहितानि । यथाक्रमं संयोजनं कृत्वा लिखत – **½ × 6 = 3**

(i) दयायाः साक्षात् प्रतिमैवासीत् दयावती ।

(ii) ब्राह्मणस्य धर्मपत्न्याः नामासीत् दयावती ।

(iii) कस्मिंश्चिद् ग्रामे एकः निर्धनः ब्राह्मणः निवसति स्म ।

(iv) कूपात् जलमाहृत्य जलेन पूरयामास ।

(v) पतिव्रतधर्मपरायणा दयावती गार्हस्थजीवने निर्धनं ब्राह्मणं पतिं लब्ध्वापि सुखमनुभवति स्म ।

(vi) एकदा सा जलाहरणाय घटमादाय कूपं प्रति गतवती ।

22. 'क' स्तम्भे पदानि दत्तानि । 'ख' स्तम्भे क्रमरहिता: तेषां समानार्थकशब्दा: दत्ता: । उचितमेलनं कृत्वा लिखत – **½ × 6 = 3**

| | **(क)** | **(ख)** |
|---|---|---|
| (i) | यथेष्टम् | कथयति |
| (ii) | उदरे | शत्रव: |
| (iii) | सुधिय: | त्यजति |
| (iv) | अरय: | इच्छानुसारम् |
| (v) | भणति | कुक्षौ |
| (vi) | मुञ्चति | विद्वांस: |